# दुःखं मे

**डॉ. राजकुमार मिश्रा**
सहायकाचार्यः साहित्यविभागः
हरियाणासंस्कृत विद्यापीठम्, पलवलम्, हरियाणा

दिनेऽन्यस्मिन् भवेन्मुक्तिर्व्यथातो जात्विति भ्रान्त्या
कथञ्चिज्जीवतो यातं वयो यातं न दुःखं मे ।।1।।

मनस्तश्चिन्तितः कालस्त्वया साकं व्यतीतो यः
प्रियेऽप्राप्योऽभवत् तादृक् प्रयत्नेऽप्यत्र दुःखं मे ।।2।।

अपास्तुं दीनतां लोकाद् यतेऽहं जीवमात्रस्य
प्रदातुं वीक्षसे लाभं स्वजातिं तेन दुःखं मे ।।3।।

परागे कीदृशास्वादोऽनुवक्तुं सक्षमो भृङ्गः
इति ज्ञात्वाऽपि घूकानां सुमे वासोऽद्य दुःखं मे ।।4।।

सरस्वत्या गृहं लङ्कीकृतं तत्सेवकैरेतत्
प्रबद्धा रौति वाक्सीताऽद्य भीता यत्र दुःखं मे ।।5।।

सुदूरं फेरवान् कर्तुं समर्थो गर्जनेनैव
तथाप्युद्योगतश्शून्योऽटवीराजोऽस्ति दुःखं मे ।।6।।

अविज्ञातेऽपि काव्यार्थे यदा ब्रूते जनो 'दिव्यम्'
तदा श्रुत्वाऽपि तद्वाक्यं न मृत्युर्हन्त दुःखं मे ।।7।।